Postal Regd.No. GAMC- 1553/2022-2024

ISSN 2454-6313

संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : १८ अङ्क : २११
डिसेम्बर - २०२३

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### कोमलं हृदयम्

कर्दमः, पङ्कः (पङ्कम्), जम्बालः, शादः इत्यादयः साहित्ये दृश्यमानाः पर्यायवाचकाः शब्दाः वर्तन्ते । शब्दकोषेषु तेषां कुलं ज्ञातुं कृतः उद्यमः अपि दृश्यते । कवयः पर्वतान्, वृक्षान्, नदीः, पुष्पाणि च वर्णयन्ति । परन्तु कोऽपि कविः पङ्कस्य वर्णने आसक्तः दृष्टः ? पङ्कस्य निन्दा नितरां क्रियते । पङ्कप्रक्षालनन्यायः निन्दां प्रति सङ्केतं करोति । 'प्रक्षालनात् हि पङ्कस्य दूरात् अस्पर्शनं वरम्' इति महाभारतकारेण अपि प्राचीनकाले पङ्कस्य निन्दा कृता । कोऽपि मनुष्यः अनैतिकं कर्म करोति तदा सः पङ्के पतितः इति उच्यते । नरकस्य वर्णने पङ्कस्य उपस्थितिः तम् एव विचारं विस्तारयति । वस्तुतः वयम् आ शैशवात् पङ्कं सद्वेषं पश्यामः । पङ्के क्रीडन् बालकः कस्मै रोचते ? अहं पृच्छामि – पङ्कं प्रति एतावान् द्वेषः किमर्थम् ? वयं पङ्कस्य दर्शनेन स्पर्शनेन वा आनन्दम् अनुभवितुं न शक्नुमः ? तस्मिन् दृश्यमानं कोमलं हृदयं वस्तुतः कपटमयं वर्तते ?

इयं सकला सृष्टिः सौन्दर्यस्य निधिः वर्तते । वयम् जगति सर्वत्र सौन्दर्यस्य दर्शनं कर्तुं शक्नुमः । तदर्थं केवलं दृष्टिः आवश्यकी । पङ्कस्य सौन्दर्यं न्यूनं नास्ति । तत्रापि तस्य वर्णस्य छटा यथास्थानं वैविध्यम् आवहति । क्वचित् लोहितः (रक्तः) पङ्कः, शाटिकाम् आच्छाद्य शयानः युवतीजनः इव शोभते । श्यामः पङ्कः यदा गौरेण पङ्केन सह मिश्रावस्थां दधाति, तदा सः उमाम् आश्लिष्टं शिवं स्मारयितुं क्षमते ।

नदीतटे प्रसृतः पङ्कः विलक्षणां शोभां तनोति । सः यदा शुष्कः भवति तदा सञ्जाताः तत्रत्याः बहुधा विभक्ताः खण्डाः, मिष्टान्नप्रियेभ्यः जनेभ्यः अवश्यं रोचिष्यन्ते । ते खण्डाः क्वचित् सूर्यातपेन वक्राः भवन्ति । तदा ते, शीतकाले बालकैः खाद्यमानाः नारिकेलस्य शुष्काः खण्डाः इव, मनोहारिणः भवन्ति ।

किञ्चित् शुष्कतां प्राप्ते पङ्के, केचन पङ्कस्पर्शकौतूहलाः बकादयः पक्षिणः अवतरन्ति । तेषां पादचिह्नैः कश्चित् अस्पष्टः मार्गः निर्मीयते । तस्य सौन्दर्यं जानन् कः मनुष्यः पङ्कं निन्देत् ? सः पङ्कः यदा सञ्चारक्षमः भवति तदा तस्य उपरि अजादयः पशवः अपि चलितुम् उत्सहन्ते । तेषां पादचिह्नानां शोभा भिन्ना एव ! तदनन्तरम् केचन उन्मत्ताः महिषाः पङ्कं शृङ्गाभ्याम् उत्किरन्ति, तदा तानि चिह्नानि महिषासुरकालीनस्य समराङ्गणस्य इतिहासं नवीकुर्वन्ति ।

अनुश्रूयते यत् केषुचित् स्थानेषु वर्तमानं पङ्कस्य गाम्भीर्यं गजम् अपि मज्जयितुं शक्नोति । सहृदयानां हृदयानि तत्र किमर्थं न मज्जेयुः ?

## व्यवहारचातुर्यम्

कस्मिंश्चित् ग्रामे भद्रसेनो नाम दैवज्ञः आसीत् । परितः स्थितेषु ग्रामेषु वसन्तः सर्वे स्वहस्तान् अस्मै प्रदर्शयन्ति स्म । हस्तदर्शनमात्रेण एव सः दैवज्ञः पुरतः स्थितस्य जनस्य मनोगतं विषयमपि वदति स्म, तस्याः व्यक्तेः भूतं भविष्यं चापि निर्दुष्टं कथयति स्म । भद्रसेनस्य एषा कीर्तिः सर्वत्र प्रसृता । अतः अन्यः कोऽपि दैवज्ञः एतं ग्रामम् आगन्तुं धैर्यं न करोति स्म । यदि अज्ञात्वा कोऽपि दैवज्ञः तं ग्रामम् आगच्छेत् तर्हि भद्रसेनः तं परीक्ष्य ग्रामीणानां पुरतः तम् अपमानितं कृत्वा प्रेषयति स्म ।

कदाचित् रामशास्त्रिनामकः कश्चित् दैवज्ञः तं ग्रामं प्रति आगतः । सः भद्रसेनविषयं सर्वथा न जानाति ।

भद्रसेनः रामशास्त्रिणः आगमनं ज्ञात्वा तम् उद्दिश्य – ''भोः हस्तसामुद्रिकशास्त्रे के के ग्रन्थाः भवता अधीताः ? भवतः ग्रामः च कः ?'' इत्यादीन् अनेकान् प्रश्नान् पृष्टवान् ।

''महोदय ! अहं हस्तसामुद्रिकविषये अल्पज्ञः । तेनैव अहं मम उदरं कथञ्चित् पूरयन् अस्मि । यत्र मम उदरं पूर्णं भवेत् स एव मम ग्रामः'' इति रामशास्त्री सविनयं भद्रसेनम् उक्तवान् ।

रामशास्त्रिणः विनयं दृष्ट्वा भद्रसेनः कुपितः सन् उक्तवान् – ''अल्पज्ञानिने भवते धनं तु मूर्खाः एव दद्युः । एतद्ग्रामीणाः न मूर्खाः । भवान् मम विषये न ज्ञातवान् स्यात् । हस्तसामुद्रिकशास्त्रे मया सह स्पर्धितुं कोऽपि न शक्नोति । मम आज्ञां विना अस्मिन् ग्रामे पातुं जलमपि न प्राप्यते केनचिदपि । एतत् मम क्षेत्रम् । अत्र अन्यस्य कस्यचिद् दैवज्ञस्य प्रवेशः सर्वथा न अनुमतः । अतः जीवितुं यदि इच्छा तर्हि अन्यः ग्रामः गम्यताम् अद्य एव'' इति ।

एतानि वचनानि रामशास्त्रिणि क्रोधम् अजनयन् । सः निश्चितवान् – 'भद्रसेनस्य गर्वभङ्गं कृत्वा एव इतः प्रस्थातव्यम्' इति ।

अतः सः शान्तेन एव स्वरेण उक्तवान् – ''भवत्तः अपि श्रेष्ठः विद्वान् अस्मि इति गर्वः सर्वथा नास्ति मम । भवान् प्रमाणं विना माम् अपमानितवान् अस्ति । विद्यायाः श्रेष्ठता परीक्षया एव निर्णेतुं शक्या'' इति ।

तावति काले तत्र सम्मिलिताः जनाः सर्वे उक्तवन्तः – ''रामशास्त्रिणः वचनं युक्तम् अस्ति । भवन्तौ उभावपि अपरिचितस्य कस्यचित् हस्तं दृष्ट्वा भविष्यं वदताम् । तदा कः शास्त्रज्ञः इति ज्ञायते । यस्य कथनं सत्यं भवति सः एव विजयी'' इति ।

तस्मिन्नेव समये कश्चन धनिकः पार्श्वग्रामस्थः तत्र आगतः । तदा तत्र सम्मिलिताः जनाः तं धनिकम् आहूय उक्तवन्तः – ''महोदय ! अत्र काचन परीक्षा प्रचलन्ती अस्ति । कृपया भवान् स्वहस्तं एतयोः प्रदर्शयतु'' इति ।

धनिकः तयोः समीपम् आगत्य स्वहस्तं प्रदर्शितवान् । भद्रसेनः आदौ धनिकस्य हस्ते स्थिताः रेखाः दृष्ट्वा उक्तवान् – ''महोदय ! अत्र परीक्षा प्रचलति इत्यतः मया सत्यमेव वक्तव्यम् । भवतः गृहे लक्ष्मीः ससन्तोषं निवसति । किन्तु भवान् महान् कृपणः । पत्नीवचनपरिपालकः भवान् स्वातन्त्र्येण कार्यं न करोति'' इति ।

धनिकः तस्य वचनेन कुपितः सन् – ''किमपि किमपि असम्बद्धम् उक्तवान् भवान् । अपमानयितुम् किम् अहम् अत्र आहूतः ?'' इति क्रोधेन उक्तवान् ।

तदा रामशास्त्री तं धनिकम् उद्दिश्य – ''महोदय ! क्रोधः मास्तु, केचन आत्मानं ज्योतिषे पण्डितं भावयन्तः

एवं वदन्ति ! भवतः हस्तं प्रदर्शयतु तावत्'' इति वदन् तेन प्रदर्शितं हस्तं पश्यन् – ''एषः हस्तः लक्ष्म्याः निवासः। हस्ते स्थिताः रेखाः उदारतां प्रदर्शयन्ति । उन्नतस्थाने स्थिताः जनाः अपि भवतः पुरतः सविनयं तिष्ठन्ति । पूर्वजन्मनः पुण्यस्य फलरूपेण एव अनुकूला पत्नी अपि लब्धा अस्ति भवता'' इति उक्तवान्।

अनेन वचनेन सन्तुष्टः सन् सः धनिकः तं प्रशंसन् उक्तवान् – ''अहो, भवतः सर्वाणि वचनानि युक्तानि एव ! मां बहोः कालतः जानन् इव यथायथं सर्वम् उक्तवान् भवान्'' इति।

ततः रामशास्त्री धनिकं सूक्ष्मं परिशील्य उक्तवान् – ''भवतः मनसि विचारः आगतः अस्ति यत् एतस्मै अङ्गुलीयकं दद्यां किम्'' इति।

अनेन वचनेन धनिकस्य मुखं विवर्णं जातम्। तदा रामशास्त्री पृष्टवान् – ''अहम् असत्यम् उक्तवान् किम् ? भवान् किमर्थम् एवं मां पश्यति ?'' इति।

तदा सः धनिकः उक्तवान् – ''आर्य ! मम आश्चर्यस्य विषयः एषः यत् मम मनसि आगतः विचारः कथं भवता ज्ञातः इति''।

एवं वदन् सः धनिकः अङ्गुल्यां स्थितं बहुमूल्यकम् अङ्गुलीयकं निष्कास्य रामशास्त्रिणः हस्ते दत्त्वा ततः निर्गतः।

तत्र सम्मिलिताः जनाः सर्वे एतत् सर्वं पश्यन्तः रामशास्त्रिणः प्रशंसां कृत्वा तमेव विजयिनं भावितवन्तः।

तेषां वचनैः भद्रसेनः लज्जया शिरः अवनमय्य स्थितवान्।

तदा रामशास्त्री तान् जनान् पश्यन् उक्तवान् – ''वस्तुतः भद्रसेनः एव हस्तसामुद्रिकशास्त्रे पण्डितः। किन्तु मादृशानां पुरतः स्वपाण्डित्यं प्रदर्शयितुं केवलं शास्त्रज्ञानं न पर्याप्तम्। अपि तु पाण्डित्येन सह व्यवहारकौशलम् अपि अपेक्षितम् । समयानुगुणं पाण्डित्यं न योज्यते चेत् अहङ्कारः वर्धते । अहङ्कारः एव अपमानस्य कारणं भवति । भद्रसेनस्य विषये एतत् एव प्रवृत्तम्'' इति।

**पञ्चरात्रम् ( ग्रन्थपरिचयः )**

नाऽन्यथा। तावति काले भटः प्रविष्य निवेदयति यद् विराटनगरात् दूतः प्राप्तः। उत्तरः दौत्यकर्मणा स्वयं समागतः। सः सर्वान् अभिवादयति। द्रोणः 'विराटेश्वरः किम् आह।' इति पृच्छति। उत्तरः कथयति यत् सः विराटेश्वरेण न किन्तु धर्मराजेन युधिष्ठिरेण प्रेषितः। युधिष्ठिरस्य सन्देशः इत्थम् – उत्तरा स्नुषा-रूपेण लब्धा। अहं विवाहं कारयितुं राजमण्डलस्य प्रतीक्षां करोमि। विवाहः तत्र स्याद् वा अत्र ?

शकुनिः कथयति – तत्रैव तत्रैव। अस्य समवकारस्य समाप्तिः त्रिभिः मनोहरैः श्लोकैः भवति –

द्रोणः – ''इत्यर्थं वयमानीताः पञ्चरात्रोऽपि वर्तते। धर्मेणाऽऽवर्जिता भिक्षा धर्मेणैव प्रदीयताम्॥''

दुर्योधनः – ''बाढं दत्तं मया राज्यं पाण्डवेभ्यो यथापुरम्। मृतेऽपि हि नराः सर्वे सत्ये तिष्ठन्ति तिष्ठति॥''

द्रोणः (भरतवाक्यम्) – 'हन्त' सर्वे प्रसन्नाः स्मः प्रवृद्धकुलसङ्ग्रहाः।

इमामपि महीं कृत्सनां राजसिंहः प्रशास्तु नः॥

## पञ्चरात्रम् ( ग्रन्थपरिचयः )

✍ व्योम शाहः

(अनुवर्तते)

महाकविभासप्रणीते पञ्चरात्रनाम्नि समवकारे एतावता अस्माभिः दृष्टं यद् दुर्योधनेन यज्ञकाले विराटेश्वरस्य अनुपस्थितिं ज्ञातुं दूतः प्रेषितः । गुरुदक्षिणारूपेण द्रोणाचार्यः राज्यस्य पाण्डवैः सह संविभागं कर्तुं दुर्योधनं याचते । "पञ्चसु रात्रिषु पाण्डवानां प्रवृत्तिः ज्ञायते चेत् तेभ्यः राज्यार्धं दीयते" इति दुर्योधनस्य निर्णयः । निःशस्त्रेण केनचित् कीचकशतस्य वधः आचरितः इति वार्ता दुर्योधनेन प्राप्ता । ततः द्वितीयाङ्कस्य प्रवेशके विराटेश्वरस्य राज्ये गोहरणप्रसङ्गः । विराटः सर्वामपि रणवार्तां स राजसभायां प्राप्नोति । उत्तरः स्वयं बृहन्नलया सह विराटस्य कृते सज्जीकृते रथे उपविश्य रणं प्रति गच्छति । रणे भीमसेनेन एकेन एव अभिमन्युः गृहीतः प्रापितः च राजसभायाम् । राजसंसदि विराटस्य पुरतः प्रच्छन्नवेषधारिणः पितापितृव्यान् अभिमन्युः अनुमानेन ज्ञातवान् । विराटः हृष्टः सन् स्वीयां पुत्रीम् अर्जुनाय प्रदत्ते । अर्जुनः ताम् उत्तराम् अभिमन्यवे प्रतिगृह्णाति ।

एतत् श्रुत्वा अभिमन्युः अधिकं रुष्टः । बृहन्नला पृच्छति यत् कथङ्कारं स पदातिना एव गृहीतः ?

सः कथयति यत् सः (भीमसेनः) शस्त्रेण विना आगतः अतः सः न तेन हतः यतो हि सः (अभिमन्युः) अर्जुनस्य पुत्रः । ततः ते राजसभां प्रविष्टाः । विराटः तं सान्त्वयति । शीघ्रमेव अभिमन्युः अनुमिनोति यदिमौ तस्य पितृव्यौ बृहन्नला च पिता । तदैव उत्तरः तत्र आगत्य सर्वेषां गोपायितानां पाण्डवानां परिचयं कारयति । विराटः इदं वचः श्रुत्वा आश्चर्यं हर्षं च प्राप्तवान् । विराटः स्वीयां पुत्रीम् उत्तराम् अर्जुनाय दातुमिच्छति । अर्जुनेन उक्तं यत् समस्तम् अन्तःपुरं तेन मातृवत् पूजितम्, अतः स्वयं न ग्रहीतुं शक्नोति स्वस्य कृते । सः तां पुत्राय अभिमन्वये प्रतिगृह्णाति ।

तृतीयाङ्कस्य प्रारम्भे भीष्मादयः वार्तां प्राप्नुवन्ति यत् सौभद्रेयः अभिमन्युः । एतां वार्तां श्रुत्वा भीष्मद्रोणौ व्यथार्त्तौ । सः विराटेश्वरसैन्यस्य इमां कृतिं निन्दति – "केनैष हस्तिग्रहणोद्यतेन यूथे प्रयाते कलभी गृहीतः ।" दुर्योधनस्य अपि इदमेव मान्यं यत् कुलयोः विरोधे जाते सति बालानाम् अपराधः न भवति । अतः तेषु कुलविरोधस्य प्रभावः न भवेत् ।

सः स्वयं अभिमन्युं प्रत्यानेतुम् उद्यतः । कर्णः अपि अभिदधाति यद् यदि वयमेकस्य बालस्य रक्षणे असमर्थाः तर्हि वल्कलधारिसदृशा एव । सर्वे सूतं पृच्छन्ति यत् केन कथं गृहीतः अभिमन्युः । सूतः कथयति यद् महारथे बाणानां समूहे कश्चिद् आगतः तदा च पदातिना एव स गृहीतः । सूतः तस्य पराक्रमस्य वर्णनं करोति यत् तस्य हस्तग्रहणमात्रेण रथः स्थितः । एतत् श्रुत्वा भीष्मः सन्तुष्टः यतो हि सः अनुमिनोति यत् तादृशः बली भीमसेनः एव, नाऽन्यः । द्रोणोऽपि स्वीयं सम्मतिं दर्शयति यत् सोऽपि भीमसेनं बाल्यात् प्रभृति जानाति, तादृशः पराक्रमी सः एव । शकुनिः आकूलः सन् कथयति यत् जगति बहवोऽपि बलशालिनः, अतः न युक्तम् एतत् प्रतिज्ञानम् । ततः तत्र अर्जुनस्य बाणं भीष्मस्य चरणयोः आपतति, ततः च द्रोणस्य पादयोः पतति । बाणस्य पुङ्खे अर्जुनस्य नामोल्लेखात् भीष्मद्रोणयोः अनुमानं पुष्टं भवति । राज्यलुब्धः शकुनिः इतोऽपि असम्मतः सन् कथयति यद् बाणमिदम् उत्तरेण लिखितं स्यात् ।

दूर्योधनः इतोऽपि मध्यस्थः एव । सः कथयति यद् युधिष्ठिरे दृष्टे एव सः राज्यस्य संविभागं करिष्यति,

( अनुसन्धानम् ३ पृष्ठे... )

## Programme Schedule - 2024-25

| Sr No | Month | Programme | Duration & Starting Date | Time | Day |
|---|---|---|---|---|---|
| 1 | Jan | संस्कृतभाषाशिक्षणम् ( प्रथमः स्तरः ) | 03/01/24 to 29/03/24 | 07:00am to 08:30am | Monday-Wednesday Friday |
| 2 | Jan | संस्कृतभाषाशिक्षणम् ( तृतीयः स्तरः ) | 03/01/24 to 29/03/24 | 06:30pm to 08:00pm | Monday-Wednesday Friday |
| 3 | Feb | स्तोत्रपाठः ( निश्चितस्तोत्राणि ) | 01/02/24to 05/03/24 | 06:30pm to 08:00pm | Tuesday -Thursday |
| 4 | Mar | छन्दःपरिचयः | 11/03/24 to 03/04/24 | 06:30pm to 08:00pm | Wednesday-Friday |
| 5 | April | संस्कृतभाषाशिक्षणम् ( द्वितीयः स्तरः ) | 01/04/24 to 28/06/24 | 07:00am to 08:30am | Monday-Wednesday Friday |
| 6 | April | संस्कृतभाषाशिक्षणम् ( प्रथमः स्तरः ) | 01/04/24 to 28/06/24 | 06:30pm to 08:00pm | Monday-Wednesday Friday |
| 7 | May | ग्रीष्मवर्गः<br>बालसंस्कृतवर्गः ( Cl.1 to 8 )<br>मार्गदर्शनम्( व्याकरणम् )( Cl.9,10)<br>(with feedback) | 01/05/24 to 11/05/24 | 10:00am to 11:30am<br>08:00am to 09:30am | Daily<br>Daily |
| 8 | June | सन्धिः | 03/06/24 to 26/06/24 | 06:30pm to 08:00pm | Mon - Wed |
| 9 | June | Value Education Through Sanskrit<br>बालसंस्कृतवर्गः<br>(Class SKg to 8)<br>Online | 08/06/24 to 22/03/25 | 06:00pm to 07:30pm | Saturday |
| 10 | June | Value Education Through Sanskrit<br>बालसंस्कृतवर्गः<br>(Class SKg to 8)<br>Offline | 09/06/24 to 23/03/25 | 11:00am to 12:30pm | Sunday |
| 11 | July | संस्कृतभाषाशिक्षणम् ( प्रथमः स्तरः ) | 01/07/24 to 27/09/24 | 07:00am to 08:00am | Monday-Wednesday Friday |
| 12 | July | संस्कृतभाषाशिक्षणम् ( द्वितीयः स्तरः ) | 01/07/24 to 27/09/24 | 06:30pm to 08:00pm | Monday-Wednesday Friday |
| 13 | July | स्तोत्रपाठः ( शिवपूजनम्, शिवमहिम्नः स्तोत्रं च ) | 02/07/24 to 01/08/24 | 06:30pm to 08:00pm | Tuesday -Thursday |
| 14 | Aug | स्तोत्रपाठः ( मातृपूजनम्, शक्राद्यस्तुतिः च ) | 06/08/24 to 05/09/24 | 06:30pm to 08:00pm | Tuesday- Thursday |
| 15 | Sept | Diploma in Sanskrit Teaching | 05/09/24 to 29/05/25 | 06:00pm to 08:00pm | Tuesday- Thursday |
| 16 | Sep | Value Education Through Sanskrit<br>बालसंस्कृतवर्गः<br>(Class SKg to 8)<br>Online for US/Canada | 06/09/24 to 30/05/25 | 05pm (PST)<br>07pm (CST)<br>08pm (EST) | Friday |
| 17 | Oct | संस्कृतभाषाशिक्षणम् ( द्वितीयः स्तरः ) | 02/10/24 to 30/12/24 | 07:00am to 08:30am | Monday-Wednesday Friday |
| 18 | Oct | संस्कृतभाषाशिक्षणम् ( तृतीयः स्तरः ) | 02/10/24 to 30/12/24 | 06:30pm to 08:00pm | Monday-Wednesday Friday |
| 19 | Nov | दीपावलीवर्गः<br>बालसंस्कृतवर्गः ( Skg to 8 )<br>मार्गदर्शनम् ( व्याकरणम् ) ( Cl.9,10 ) | 06/11/24 to 16/11/24 | 10:00am to 11:30am<br>08:30am to 11:00am | Daily<br>Daily |
| 20 | Dec | Value Education Through Sanskrit<br>बालसंस्कृतवर्गः<br>(Class SKg to 8)<br>Offline | 07/12/24 to 29/03/25 | 06:00pm to 07:30pm | Saturday |

• **For more information contact : Dr. Mihir Upadhyay Mobile: 98246 16237**

Core House, Off CG Road Ahmedabad 380 006 • www.eklavyasanskritacademy.org • E-mail: mihiresa@gmail.com

## कृपया हसन्तु

**भिक्षुकः** - (श्रेष्ठिनं प्रति) महोदय ! १५० रूप्यकाणां दानेन मम सहयोगं करोतु कृपया । अहं मम कुटुम्बात् वियुक्तः अस्मि ।

**श्रेष्ठी** - 'तव कुटुम्बः कुत्र अस्ति ?' इति पूर्वं वद ।

**भिक्षुकः** - चलनचित्रगृहे चलनचित्रं पश्यन् अस्ति ।

★ ★ ★ ★ ★

**रमणः** - (नमनम् उद्दिश्य) त्वं दिवसे कतिवारं क्षौरक्रियां करोषि ?

**नमनः** - अहं दिवसे २० वारं क्षौरक्रियां करोमि ।

**रमणः** - उन्मत्तः असि त्वम् । एकस्मिन् दिवसे कः २० वारं क्षौरक्रियां कुर्यात् ?

**नमनः** - अहं करोमि, यतो हि अहं नापितः अस्मि ।

**क्षौरक्रिया** - shaving, **नापितः** - barber

★ ★ ★ ★ ★

विवाहसमये दीर्घकालं यावत् वरः वधूः च तयोः शिरः अवनमय्य एव उपविष्टौ आस्ताम् । तौ दृष्ट्वा काचित् वृद्धा अवदत् - "पश्यत, वरवध्वौ कियन्तौ संस्कारिणौ, लज्जया शिरः अधः कृत्वा एव उपविष्टौ उपरि एव न पश्यतः ।" तदा तत्र उपस्थितः कश्चन अतिथिः अवदत् - एतौ WhatsApp पश्यन्तौ स्तः ।

## सुभाषितम्

**– संस्कृतविकिपीडियाजालस्थानात्**

**पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम् ।**
**सन्तः परीक्ष्यान्यतरद् भजन्ते मूढः परप्रत्ययनेयबुद्धिः ॥**

**तात्पर्यम्** – पुरातनं सर्वं सुवर्णमिति वक्तुं न शक्यते । नूतनम् इत्यनेन कारणेन किमपि निन्दार्हं न भवति । विवेकिनः स्वतः परीक्ष्य योग्यमिति भासते चेदेव तद् अङ्गीकुर्वन्ति । मूढाः अन्यैः उक्तमेव विश्वस्य व्यवहरन्ति । तेषां स्वीयं ज्ञानं न भवति ।

**पृथिव्यां त्रीणि रत्नानि जलम् अन्नं सुभाषितम् । मूढैः पाषाणखण्डेषु रत्नसंज्ञा प्रदीयते ॥**

**तात्पर्यम्** – जगति जलम् अन्नं सुभाषितम् इत्येतानि त्रीणि रत्नानि विद्यन्ते । शिलाखण्डाः एव रत्नानि इति मूर्खाः केवलं मन्यन्ते ।

**प्रणयो मरणान्तः स्यात् कोपस्तु क्षणभङ्गुरः । उपदेशो यथाकालं विद्वेषो न कदाचन ॥**

**तात्पर्यम्** – स्नेहः मरणपर्यन्तं स्यात्, कोपः क्षणमात्रं भवेत् । अवश्यं चेदेव उपदेशः कर्तव्यः । द्वेषः तु कदापि न भवेत् ।

**प्रत्यहं प्रत्यवेक्षत नरश्चरितमात्मनः । किं नु मे पशुभिस्तुल्यं किं नु सत्पुरुषैरिति ॥**

**तात्पर्यम्** – मम व्यवहारेषु कः पशोः इव, कः सत्पुरुषस्य इव अस्ति इति प्रतिदिनं मानवः स्वस्य व्यवहारं परिशीलयेत् ।

## ज्ञानसरित्

श्यामः पटेलः

**जीवेम 'किंग-क्लोन' इव !** – एका वैदिकी श्रुतिः अस्ति – जीवेम शरदः शतम्। वयं मनुष्याः शतस्य वर्षाणां जीवनं प्राप्नुम इति अस्याः भावः अस्ति। अस्माभिः तु केवलं शतं वर्षाणि यावत् जीवितुं कामना कृता। किन्तु भवन्तः जानन्ति यत् विश्वे बहवः सन्ति ये अस्माकम् अपेक्षया दीर्घं जीवन्ति ? तेषां कः वृद्धतमः अस्ति ? किम् आयुः तस्य ? तद् अद्य जिज्ञासामहै।

समग्रजीवसृष्टौ वनस्पतयः एव सर्वाधिकं जीवन्ति । बहवः वृक्षाः सहस्रवर्षाणाम् आयुः विदधति । तादृशम् एकं सस्यम् अस्ति – 'किंग-क्लोन'। केलिफोर्नियायाः समीपे 'मोजावी' नामाख्या मरुभूमिः अस्ति। तत्र एतत् सस्यं सप्तशताधिक-एकादशसहस्रेभ्यः (११७००) वर्षेभ्यः जीवति । कण्टक-लता-तृणानां सङ्ग्रहः इव दृश्यमानम् इदं सस्यं समभूमौ ४५ फिटपरिमितस्य चक्राकारविस्तारे विस्तीर्णम् अस्ति। अयं वनस्पतिः 'क्रोओसोर बुश' नाम्नाऽपि विख्यातः। वैज्ञानिकानां मतानुसारम् एतत् सस्यमेव विश्वस्य वृद्धतमं सस्यम् अस्ति। केलिफोर्निया-विश्वविद्यालयस्य संशोधकाः अत्याधुनिकैः उपकरणैः एव गवेषणां कृत्वा एवम् उद्घोषितवन्तः । एतस्य सस्यस्य समीपं गन्तुम् अनुज्ञा न वर्तते। लघुपर्णानि विदधत् 'किंग-क्लोन' विना जलमपि जीवितुं शक्नोति। तस्य पर्णानाम् उपरि स्निग्धद्रवः आच्छादितः भवति। येन पर्णानि हरितानि एव भवन्ति। अस्य पुष्पाणि पीतवर्णस्य भवन्ति। एतस्य सस्यस्य प्रभावेन अन्यः वनस्पतिः तस्य समीपं न उद्भवितुं शक्नोति।

केलिफोर्नियायाः वनानि अपि वयोवृद्धानां वृक्षाणां कृते प्रसिद्धानि सन्ति। पञ्चसहस्रवर्षीयः ग्रेट-बसीन-पाइन-वृक्षः तथा च द्विसहस्रवर्षीयाः अनेके जायन्ट-सिक्वोया-वृक्षाः अपि तत्र सन्ति।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **हयः** | अश्व | horse |
| **वैनतेयः** | गरुड | garuda |
| **विध्वंसः** | नाश | ruin |
| **डिम्भः** | शिशु | young child |
| **वनेचरः** | वन मे रहनेवाला | forester |
| **महीभुक्** | राजा | king |
| **हठः** | बलपूर्वक किया गया | oppression |
| **दुरारोहः** | दुर्गम | of difficult asscent |
| **लिपिकरः** | लिपिकार/लेखक | scriber |
| **चित्रकरः** | चित्रकार | painter |
| **प्रकामम्** | यथेष्ट | amourous |
| **दम्भोलि** | वज्र | thunderbolt (of India) |
| **रात्रिञ्चरः** | राक्षस | demon |
| **वारांनिधिः** | समुद्र | ocean |
| **कन्था** | कथरी | patched garment |

## किं भवन्तः जानन्ति ?

**१) लङ्कापतिः रावणः कस्य परमः भक्तः आसीत् ?**
(क) सूर्यस्य (ख) विष्णोः (ग) गणेशस्य (घ) शिवस्य

**२) गायत्रीमन्त्रे कस्य देवस्य आराधनं वर्तते ?**
(क) विष्णोः (ख) शिवस्य (ग) वरुणस्य (घ) सूर्यस्य

**३) एतेषु कः सिक्खगुरुः खालसापन्थस्य स्थापनाम् अकरोत् ?**
(क) नानकदेवः (ख) तेगबहादुरः (ग) गोविन्दसिंहः (घ) अङ्गददेवः

**४) ब्रह्मणः उत्पत्तिः कस्मात् पुष्पात् जाता आसीत् ?**
(क) पाटलपुष्पात् (ख) कमलपुष्पात् (ग) जपापुष्पात् (घ) चम्पकपुष्पात्

**५) भूमितत्त्वस्य अधिष्ठातृदेवः कः वर्तते ?**
(क) विष्णुः (ख) अग्निः (ग) गणेशः (घ) सूर्यः

**६) एतेषु कः पितुः आज्ञया यमराजेन मेलितुम् अगच्छत् ?**
(क) ध्रुवः (ख) प्रह्लादः (ग) नचिकेताः (घ) श्रवणः

**७) एतेषु कः सूर्यं फलं मत्वा खादितुं यत्नम् अकरोत् ?**
(क) कुम्भकर्णः (ख) हनुमान् (ग) सुरसा (घ) भीमसेनः

उत्तराणि – (१) घ (२) घ (३) ग (४) ख (५) ग (६) ग (७) ख

## अस्माकम् आगामिकार्यक्रमा:

EKLAVYA SANSKRIT ACADEMY

### स्तोत्रपाठ:
### ( निश्चितस्तोत्राणि )

**Date :** 01/02/24 to 05/03/24
**Day :** Tuesday-Thursday
**Time :** 6:30pm to 08:00pm
**Fees :** 2500/-

### छन्द:परिचय:

**Date :** 11/03/24 to 03/04/24
**Day :** Wednesday-Friday
**Time :** 6:30pm to 08:00pm
**Fees :** 2500/-

**contact: Dr Mihir Upadhyay, 98246 16237**

EKLAVYA SANSKRIT ACADEMY

**Online / Offline**

**Admission Open**

### संस्कृतभाषाशिक्षणम्

**First Level**

**Date :** 03/01/24 to 29/03/24
**Day :** Mon-Wed-Fri
**Time :** 7:00am to 8:30am
**Fees :** 6000/-

**Third Level**

**Date :** 03/01/24 to 29/03/24
**Day :** Mon-Wed-Fri
**Time :** 6:30pm to 8:00pm
**Fees :** 6000/-

**Value Education Through Sanskrit**

### बालसंस्कृतवर्ग:

**(Class SKg to 8)**
**Offline**

**Date :** 09/12/23 to 30/03/24
**Day :** Saturday
**Time :** 6:00pm to 7:30pm
**Fees :** 4000/-

संस्कृत-
### साम्प्रतम्

नमस्कार:
यदि भवन्त: "साम्प्रतम्" मासिकीपत्रिकाया: ग्राहका: भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

वार्षिकं रू - 100
द्वैवार्षिकं रू - 175
त्रैवार्षिकं रू - 250
अङ्कमूल्यं रू - 10

**प्रियवाचका:**

- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्या: लेखा:, कथा:, हास्यकणिका: वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकाया: विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006